# तैत्तिरीयोपनिषत्

## भृगुवल्ली

## प्रथमोऽनुवाकः

भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच।

अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति। तꣳहोवाच। यतो वा इमानि भूतानि जायन्ते।

येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति। स तपोऽतप्यत।

स तपस्तप्त्वा॥ ३.१॥

**अध्यायसम्बन्धः**

१) "सत्यं ज्ञानमनन्तं ब्रह्म, आकाशादि-कार्यम् अन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवद् इव

उपलभ्यमानं यस्मात्, तस्मात् सर्व-कार्य-विलक्षणम् अदृश्यादि-धर्मकमेव आनन्दम्।

'तदेव अहम्' इति विजानीयात्, अनुप्रवेशस्य तदर्थत्वात्।

तस्यैवं विजानतः शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवतः” इति एवमानन्द-वल्ल्यां

विवक्षितोऽर्थः। परिसमाप्ता च ब्रह्म-विद्या। अतःपरं ब्रह्म-विद्या-साधनं तपः वक्तव्यम्, अन्नादि-

विषयाणि च उपासनानि अनुक्तानि इत्यतः इदमारभ्यते।

**अख्यायिका**

२) आख्यायिका विद्या-स्तुतये, प्रियाय पुत्राय पित्रा उक्ता इति। भृगुर्वै वारुणिः।

वै-शब्दः प्रसिद्धानुस्मारकः। ‘भृगुः’ इति एवं-नामा प्रसिद्धः अनुस्मर्यते[1]।

वारुणिः वरुणस्यापत्यं वारुणिः। वरुणं पितरं ब्रह्म-विजिज्ञासुः उपससार उपगतवान्।

‘अधीहि भगवो ब्रह्म’ इत्यनेन मन्त्रेण। (अधीहि अध्यापय। कथय इत्यर्थः)।

---

[1] पा.भेद - अनुस्मार्यते इति।

स च पिता विधिवदुपसन्नाय तस्मै पुत्राय एतद् वचनं प्रोवाच।

**विद्योपदेशः - ब्रह्मणः द्वारभूतम्, ब्रह्मलक्षणं च**

३) 'अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचम्' इति। अन्नं शरीरम्, तदभ्यन्तरं च प्राणम् अत्तारम्।

अनन्तरम् उपलब्धि-साधनानि, चक्षुः श्रोत्रं मनो वाचम् इति एतानि, ब्रह्मोपलब्धौ द्वाराणि उक्तवान्।

उक्त्वा च द्वारभूतान्येतान्यन्नादीनि तं भृगुं ह उवाच ब्रह्मणो लक्षणम्[2]।

किं तत्? यतः यस्माद् वै इमानि ब्रह्मादीनि स्तम्ब-पर्यन्तानि भूतानि जायन्ते।

येन जातानि जीवन्ति प्राणान् धारयन्ति, वर्धन्ते।

विनाश-काले च यत्प्रयन्ति यद् ब्रह्म प्रति गच्छन्ति अभिसंविशन्ति तादात्म्यमेव प्रतिपद्यन्ते।

---

[2] तटस्थलक्षणम्।

उत्पत्ति-स्थिति-लय-कालेषु यदात्मतां न जहति भूतानि, तदेतद् ब्रह्मणो लक्षणम्।

तद् ब्रह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्व। यदेवं लक्षणं ब्रह्म तदन्नादि-द्वारेण प्रतिपद्यस्व इत्यर्थः।

श्रुत्यन्तरम् च "प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः ते

निचिक्युः ब्रह्म पुराणमग्र्यम्" (बृ. ४.४.१८) इति ब्रह्मोपलब्धौ द्वाराणि एतानि इति दर्शयति।

**तपसः ब्रह्मविद्यां प्रति विशेषसाधनत्वप्रदर्शनम्**

४) स भृगुः ब्रह्मोपलब्धि-द्वाराणि ब्रह्म-लक्षणम् च श्रुत्वा पितुः, तपः ब्रह्मोपलब्धि-साधनत्वेन अतप्यत

तप्तवान्।

कुतः पुनः अनुपदिष्टस्य एव तपसः साधनत्व-प्रतिपत्तिः भृगोः? सावशेषोक्तेः।

अन्नादि-ब्रह्मणः प्रतिपत्तौ द्वारम्, लक्षणं च यतो वा इमानि इत्याद्युक्तवान्। सावशेषं हि तत्।

साक्षाद् ब्रह्मणोऽनिर्देशात्।

अन्यथा हि स्वरूपेण एव ब्रह्म निर्देष्टव्यं जिज्ञासवे पुत्राय 'इदमित्थं रूपं ब्रह्म' इति।

न च एवं निरदिशत्। किं तर्हि? सावशेषमेवोक्तवान्।

अतः अवगम्यते नूनं साधनान्तरम् अप्यपेक्षते पिता ब्रह्म-विज्ञानं प्रति इति।

५) तपोविशेष-प्रतिपत्तिस्तु सर्व-साधकतमत्वात्।

सर्वेषां हि नियत-साध्य-विषयाणां साधनानां तप एव साधकतमं साधनमिति हि प्रसिद्धं लोके।

तस्मात् पित्रा अनुपदिष्टमपि ब्रह्म-विज्ञान-साधनत्वेन तपः प्रतिपेदे भृगुः।

तच्च तपः बाह्यान्तः-करण-समाधानम्। तद्द्वारकत्वाद् ब्रह्म-प्रतिपत्तेः।

“मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः।

तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते” (म.भा.शां. ३.२६०.२५) इति स्मृतेः।

सः च तपस्तप्त्वा।। १।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-भृगुवल्ली-भाष्ये प्रथमोऽनुवाकः।।

## द्वितीयोऽनुवाकः

अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति।
अन्नं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।
तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ३.२॥

**अन्नब्रह्मविज्ञानम्**

६) अन्नं[3] ब्रह्मेति व्यजानात् विज्ञातवान्। तद्धि यथोक्त-लक्षणोपेतम्।

कथम्? अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति।

अन्नं प्रयन्त्यभिसंविशन्तीति। तस्मात्, युक्तमन्नस्य ब्रह्मत्वमित्यभिप्रायः।

**अन्नब्रह्मविज्ञाने संशयोत्पत्तिः तद्धेतुश्च**

७) स एवं तपः तप्त्वा अन्नं ब्रह्मेति विज्ञाय लक्षणेनोपपत्त्या च, पुनरेव संशयमापन्नः वरुणं

पितरमुपससार। 'अधीहि भगवो ब्रह्म' इति।

[3] अद्यते भुज्यते उपलभ्यते सर्वैः इति सर्वप्रतिपत्तृसाधारणं स्थूलदेहकारणं भूतपञ्चकं विराट्संज्ञकम् अन्नशब्देन उच्यते। (आ.गि)

कः पुनः संशय-हेतुः अस्य? इत्युच्यते - अन्नस्य उत्पत्ति-दर्शनात्।

तपसः पुनः पुनरुपदेशः साधनातिशयत्वाव-धारणार्थः।

यावद् ब्रह्मणो लक्षणं निरतिशयं न भवति, यावच्च जिज्ञासा न निवर्त्तते, तावत् तपः एव ते साधनम्।

तपसा एव ब्रह्म विजिज्ञासस्व इत्यर्थः। ऋज्वन्यत्[4]।। २-५)।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-भृगुवल्ली-भाष्ये द्वितीयोऽनुवाकः।।

[4] विराजः उत्पत्तिदर्शनात् श्रुतिस्मृतिषु लक्षणं तत्र सम्पूर्णं न भवति इति पुनः तपोऽतप्यत। विचार्य च तत्कारणं क्रियाशक्तिविशिष्टतया प्राणशब्दलक्ष्यं हिरण्यगर्भं संकल्पाध्यवसायशक्तिविशिष्टतया च मनोविज्ञानशब्दलक्ष्यं ब्रह्म इति व्यजानात्। (आ.गि)

## तृतीयोऽनुवाकः

प्राणो ब्रह्मेति व्यजानात्। प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते। प्राणेन जातानि जीवन्ति।

प्राणं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।

तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ३.३ ॥

## चतुर्थोऽनुवाकः

मनो ब्रह्मेति व्यजानात्। मनसो ह्येव खल्विमानि भूतानि जायन्ते। मनसा जातानि जीवन्ति।

मनः प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।

तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ३.४॥

## पञ्चमोऽनुवाकः

विज्ञानं ब्रह्मेति व्यजानात्। विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते। विज्ञानेन जातानि जीवन्ति।

विज्ञानं प्रयन्त्यभिसंविशन्तीति। तद्विज्ञाय। पुनरेव वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।

तꣳहोवाच। तपसा ब्रह्म विजिज्ञासस्व। तपो ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा॥ ३.५॥

# षष्ठोऽनुवाकः

**आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।**

**आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्त्यभिसंविशन्तीति। सैषा भार्गवी वारुणी विद्या।**

**परमे व्योमन् प्रतिष्ठिता। य एवं वेद प्रतितिष्ठति। अन्नवानन्नादो भवति।**

**महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ३.६॥**

**प्रकरणार्थः**

८) एवं तपसा विशुद्धात्मा प्राणादिषु साकल्येन ब्रह्म-लक्षणम् अपश्यन् शनैः शनैः अन्तरनुप्रविश्य

अन्तरतमम् आनन्दं ब्रह्म विज्ञातवान् तपसा एव साधनेन भृगुः।

तस्माद् ब्रह्म विजिज्ञासुना बाह्यान्तः-करण-समाधान-लक्षणं परमं तपः साधनम् अनुष्ठेयमिति

प्रकरणार्थः।

**आख्यायिकानिर्वृत्तमर्थम् - ब्रह्मविद्यायाः परमं फलम्**

९) अधुना आख्यायिकातः अपसृत्य[5] श्रुतिः स्वेन वचनेन आख्यायिका-निर्वृत्तम्[6] अर्थमाचष्टे।

सा एषा भार्गवी भृगुणा विदिता, वरुणेन प्रोक्ता वारुणी विद्या।

परमे व्योमन् हृदयाकाश-गुहायां परमे आनन्दे अद्वैते प्रतिष्ठिता परिसमाप्ता, अन्नमयादात्मनः अधि

प्रवृत्ता। यः एवम् अन्योऽपि तपसा एव साधनेन अनेनैव क्रमेण अनुप्रविश्य, आनन्दं ब्रह्म वेद, स एवं

विद्या-प्रतिष्ठानात् प्रतितिष्ठति आनन्दे परमे ब्रह्मणि। ब्रह्मैव भवति इत्यर्थः।

**ब्रह्मविद्यायाः दृष्टं पलम्**

१०) दृष्टं च फलं तस्य उच्यते। अन्नवान् प्रभूतमन्नमस्य विद्यते इत्यन्नवान्।

अन्यथा सत्ता-मात्रेण तु सर्वः हि अन्नवान् इति विद्याया विशेषो न स्यात्।

---

[5] पा.भेद - आख्यायिकां च उपसंहृत्य इति।

[6] पा.भेद - निर्वर्त्यमिति।

एवमन्नमत्तीति अन्नादः। दीप्ताग्निः भवति इत्यर्थः। महान् भवति।

केन महत्त्वम्? इत्यत आह - प्रजया पुत्रादिना पशुभिः गवाश्वादिभिः ब्रह्मवर्चसेन शम-दम-ज्ञानादि-

निमित्तेन तेजसा।

महान् भवति कीर्त्या ख्यात्या शुभप्रचार[7] निमित्तया।। ६।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-भृगुवल्ली-भाष्ये षष्ठोऽनुवाकः।।

[7] पा.भेद - शुभाचारेति।

# सप्तमोऽनुवाकः

**अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्।**

**शरीरे प्राणः प्रतिष्ठितः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितम् वेद प्रतितिष्ठति।**

**अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ३.७॥**

**अन्नब्रह्मोपासकस्य अन्ननिन्दानिषेधरूप-व्रतोपदेशद्वारा अन्नस्तुतिः**

११) किञ्च अन्नेन द्वार-भूतेन ब्रह्म विज्ञातं यस्मात्, तस्माद् गुरुम् इव अन्नं न निन्द्यात्।

तद् अस्य एवं ब्रह्म-विदः व्रतम् उपदिश्यते। व्रतोपदेशः अन्न-स्तुतये।

स्तुति-भाक्त्वं च अन्नस्य ब्रह्मोपलब्ध्युपायत्वात्।

**प्राणशरीरयोः अन्नान्नादत्वोपासन-प्रदर्शनम्**

१२) प्राणो वै अन्नम्। शरीरान्तर्भावात् प्राणस्य। यद्यस्यान्तः प्रतिष्ठितं भवति, तत्तस्यान्नं भवतीति।

शरीरे च प्राणः प्रतिष्ठितः। तस्मात् प्राणः अन्नम्, शरीरमन्नादम्। तथा शरीरमप्यन्नम्, प्राणोऽन्नादः।

कस्मात्? प्राणे शरीरं प्रतिष्ठितम्। तन्निमित्तत्वात् शरीर-स्थितेः।

तस्मात् तदेतद् उभयं शरीरं प्राणश्च अन्नमन्नादश्च। येन अन्योन्यस्मिन् प्रतिष्ठितम्, तेन अन्नम्।

येन अन्योन्यस्य प्रतिष्ठा, तेन अन्नादः। तस्मात् प्राणः शरीरं च उभयमन्नमन्नादं च।

सः यः एवं एतद् अन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति अन्नान्नदात्मनैव। किञ्च अन्नवानन्नादो भवति इत्यादि

पूर्ववत्।। ७ ।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ तैत्तिरीयोपनिषद्-भृगुवल्ली-भाष्ये सप्तमोऽनुवाकः।।

## अष्टमोऽनुवाकः

अन्नं न परिचक्षीत। तद्व्रतम्। आपो वा अन्नम्। ज्योतिरन्नादम्। अप्सु ज्योतिः प्रतिष्ठितम्।
ज्योतिष्यापः प्रतिष्ठिताः। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितम् वेद प्रतितिष्ठति।
अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ३.८ ॥

**अन्नब्रह्मोपासकस्य अन्नापरिहाररूप-व्रतोपदेशद्वारा अन्नस्तुतिः**

१३) अन्नं न परिचक्षीत नैव परिहरेत्। तद् व्रतम्[8]। पूर्ववत् स्तुत्यर्थम्।

तदेव शुभाशुभ-कल्पनया अपरिह्रियमाणम्[9] स्तुतं महीकृतम् अन्नं स्यात्।

एवं यथोक्तम् उत्तरेषु अपि ‘आपो वा अन्नम्’ इत्यादिषु योजयेत्।

**अब्ज्योतिषोः अन्नान्नादत्वोपासन-प्रदर्शनम्**

१४) अप्सु ज्योतिः इति। अब्ज्योतिषोः अन्नान्नादगुणत्वेन उपासकस्य अन्नस्य बहूकरणं व्रतम्।। ८ ।।

---

[8] शरीरप्राणयोः अन्नान्नादत्वोपासकस्य प्राप्तान्नाप्रत्याख्यानं व्रतमिति आह।

[9] पा.भेद - अपरिगृह्यमाणमिति।

# नवमोऽनुवाकः

**अन्नं बहु कुर्वीत। तद्व्रतम्। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः।**

**आकाशो पृथिवी प्रतिष्ठिता। तदेतदन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितम् वेद प्रतितिष्ठति।**

**अन्नवानन्नादो भवति। महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान् कीर्त्या॥ ३.९ ॥**

अब्ज्योतिषः अन्नान्नादगुणत्वेन उपासकस्य अन्नस्य बहूकरणं व्रतम्।

## दशमोऽनुवाकः

न कंचन वसतौ प्रत्याचक्षीत। तद्व्रतम्। तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्। अराध्यस्मा अन्नमित्याचक्षते। एतद्वै मुखतोऽन्नꣳराद्धम्। मुखतोऽस्मा अन्नꣳराध्यते। एतद्वै मध्यतोऽन्नꣳराद्धम्। मध्यतोऽस्मा अन्नꣳराध्यते। एतद्वा अन्ततोऽन्नꣳराद्धम्। अन्ततोऽस्मा अन्नꣳराध्यते॥ ३.१०.१ ॥

य एवं वेद। क्षेम इति वाचि। योगक्षेम इति प्राणापानयोः। कर्मेति हस्तयोः। गतिरिति पादयोः। विमुक्तिरिति पायौ। इति मानुषीस्समाज्ञाः। अथ दैवीः। तृप्तिरिति वृष्टौ। बलमिति विद्युति॥ ३.१०.२ ॥

यश इति पशुषु। ज्योतिरिति नक्षत्रेषु। प्रजातिरमृतमानन्द इत्युपस्थे। सर्वमित्याकाशे। तत्प्रतिष्ठेत्युपासीत। प्रतिष्ठावान् भवति। तन्मह इत्युपासीत। महान् भवति। तन्मन इत्युपासीत। मानवान् भवति॥ ३.१०.३ ॥

तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान् भवति ।

तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तः सपत्नाः । परि येऽप्रिया भ्रातृव्याः ।

स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः ॥ ३.१०.४ ॥

स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयत्मानमुप-संक्रम्य ।

एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य ।

एतं विज्ञानमयमात्मानमुप-संक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य ।

इमाँल्लोकान् कामान्नी कामरूप्यनुसंचरन् । एतत्साम गायन्नास्ते ।

हा३ वु हा३ वु हा३ वु ॥ ३.१०.५ ॥

अहमन्नमहमन्नमहमन्नम् ।

अहमन्नादो२ऽहमन्नादो२ऽ हमन्नादः । अहꣳश्लोककृदहꣳश्लोककृदहꣳश्लोककृत् ।

अहमस्मि प्रथमजा ऋता३ स्य । पूर्वं देवेभ्यो अमृतस्य ना३ भा इ ।

यो मा ददाति स इदेव मा३ वाः । अहमन्नमन्नमदन्तमा३ द्मि । अहं विश्वं भुवनमभ्यभवाम् ।

सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥ ३.१०.६ ॥

**बह्वन्नकरणे प्रथमो हेतुः - अतिथिसत्कारः**

१५) तथा पृथिव्याकाशोपासकस्य। वसतौ वसति-निमित्तं कञ्चन कञ्चिदपि न प्रत्याचक्षीत।

न प्रत्याख्यानं कुर्वीत[10]। वसत्यर्थमागतं न निवारयेद् इत्यर्थः।

वासे च दत्ते अवश्यं हि अन्नं दातव्यम्। तद् व्रतम्[11]।

तस्माद्यया कया च विधया येन केन च प्रकारेण बह्वन्नं प्राप्नुयात् बह्वन्न-सङ्ग्रहं कुर्याद् इत्यर्थः।

**बह्वन्नकरणे द्वितीयो हेतुः - शिष्टाचारानुसरणीयत्वम्**

१६) यस्माद् अन्नवन्तः विद्वांसः अभ्यागताय अन्नार्थिने अराधि, 'संसिद्धम् अस्मै अन्नम्' इत्याचक्षते।

न नास्तीति प्रत्याख्यानं कुर्वन्ति। तस्माच्च हेतोः 'बह्वन्नं प्राप्नुयाद्' इति पूर्वेण सम्बन्धः।

---

10 पा.भेद - न प्रत्याख्यानं कुर्वीत इति नास्ति आनन्दाश्रमे।

11 पा.भेद - तद् व्रतम् इति नास्ति आनन्दाश्रमे।

**अन्नदानस्य माहात्म्यम्**

१७) अपि च अन्न-दानस्य माहात्म्यम् उच्यते।

यथा यत्कालं प्रयच्छत्यन्नम्, तथा तत्कालमेव प्रत्युपनमते।

कथमिति? तदेतदाह - एतद्वै अन्नं मुखतः मुख्ये प्रथमे वयसि, मुख्यया वा वृत्त्या पूजा-पुरस्सरम्,

अभ्यागताय अन्नार्थिने राद्धम् संसिद्धम्। प्रयच्छति इति वाक्य-शेषः।

तस्य किं फलं स्यात्? इत्युच्यते - मुखतः मुख्ये पूर्वे वयसि, मुख्यया वा वृत्त्या, अस्मै अन्नदाय अन्नं

राध्यते। यथा-दत्तम् उपतिष्ठते इत्यर्थः।

एवं मध्यतः मध्यमे वयसि, मध्यमेन वा उपचारेण।

तथा अन्ततः अन्ते वयसि, जघन्येन वा उपचारेण परिभवेन।

तथैव अस्मै राध्यते संसिध्यति अन्नम्। य एवं वेद।

यः एवम् अन्नस्य यथोक्तं माहात्म्यं वेद, तद्दानस्य यथोक्तं फलम् उपनमेत्।

**ब्रह्मणः उपासनप्रकारः**
**आध्यात्मिकानि उपासनानि**

१८) इदानीं ब्रह्मणः उपासन-प्रकारः उच्यते। क्षेम इति वाचि। क्षेमो नाम उपात्त-परिरक्षणम्।

ब्रह्म वाचि क्षेम-रूपेण प्रतिष्ठितम् इति उपास्यम्। योगक्षेम इति। योगः अनुपात्तस्य उपादानम्।

तौ हि योग-क्षेमौ प्राणापानयोः बलवतोः सतोः भवतः यद्यपि, तथापि न प्राणापान-निमित्तौ एव।

किं तर्हि? ब्रह्म-निमित्तौ। तस्माद् ब्रह्म योग-क्षेमात्मना प्राणापानयोः प्रतिष्ठितम् इति उपास्यम्।

एवमुत्तरेषु अन्येषु तेन तेन आत्मना ब्रह्म एव उपास्यम्।

कर्मणः ब्रह्म-निर्वर्त्यत्वाद् हस्तयोः कर्मात्मना ब्रह्म प्रतिष्ठितम् इति उपास्यम्। गतिरिति पादयोः।

विमुक्तिरिति पायौ। इति एताः मानुषीः मनुष्येषु भवाः मानुष्याः।

समाज्ञाः आध्यात्मिक्यः समाज्ञाः ज्ञानानि, विज्ञानानि। उपासनानि इत्यर्थः।

**अधिदैविकानि उपासनानि**

१९) अथ अनन्तरं दैवीः दैव्यः, देवेषु भवाः समाज्ञाः उच्यन्ते। तृप्तिरिति वृष्टौ।

वृष्टेः अन्नादि-द्वारेण तृप्ति-हेतुत्वात् ब्रह्मैव तृप्यात्मना वृष्टौ व्यवस्थितमित्युपास्यम्।

तथा अन्येषु तेन तेनात्मना ब्रह्मैव उपास्यम्। तथा बल-रूपेण विद्युति। यशो-रूपेण पशुषु।

ज्योती-रूपेण नक्षत्रेषु। प्रजातिः अमृतम् अमृतत्व-प्राप्तिः पुत्रेण ऋण-विमोक्ष-द्वारेण, आनन्दः सुखमिति

एतत्सर्वम् उपस्थ-निमित्तं ब्रह्मैव अनेनात्मना उपस्थे प्रतिष्ठितमित्युपास्यम्।

**आकाशोपासनप्रकारः तत्फलं च**

२०) सर्वं हि आकाशे प्रतिष्ठितम्। अतो यत्सर्वम् आकाशे तद् ब्रह्मैव इत्युपास्यम्।

तच्च आकाशं ब्रह्मैव। तस्मात् तत् सर्वस्य प्रतिष्ठेत्युपासीत। प्रतिष्ठा-गुणोपासनात् प्रतिष्ठावान् भवति।

एवं सर्वेष्वपि। यद् यत्र अधिगतं फलम्[12], तद् ब्रह्मैव। तदुपासनात् तद्वान् भवति इति द्रष्टव्यम्।

श्रुत्यन्तराच्च - “तं यथा यथोपासते तदेव भवति” (शतपथ ब्रा. १०.५.२.२०, मुद्गल. ३.३) इति।

तन्मह इत्युपासीत। महः महत्त्व-गुणवत्, तदुपासीत। महान् भवति। तन्मन इत्युपासीत। मननं मनः।

[12] पा.भेद - यद्यत् तदधीनमिति आनन्दाश्रमः।

मानवान् भवति। मनन-समर्थो भवति। तन्नम इत्युपासीत। नमनं नमः। नमन-गुणवत् तदुपासीत।

नम्यन्ते प्रह्वी-भवन्ति अस्मै उपासित्रे कामाः। काम्यन्ते इति कामाः। भोग्याः विषयाः इत्यर्थः।

तद् ब्रह्मेत्युपासीत। ब्रह्म परिवृढतममित्युपासीत। ब्रह्मवान् तद्गुणो भवति।

तद् ब्रह्मणः परिमर इत्युपासीत। ब्रह्मणः परिमरः, परिम्रियन्ते अस्मिन् पञ्च देवताः विद्युत्, वृष्टिः,

चन्द्रमाः, आदित्यः, अग्निः इत्येताः। अतो वायुः परिमरः। श्रुत्यन्तर-प्रसिद्धेः (छा. ४.३.१)।

स एषः एवायं वायुराकाशेन अनन्यः इत्याकाशो ब्रह्मणः परिमरः।

तमाकाशं वाय्वात्मानं ब्रह्मणः परिमर इत्युपासीत। परि एनम् एवं-विदं प्रतिस्पर्धिनः द्विषन्तः।

अद्विषन्तोऽपि च सपत्नाः यतो भवन्ति, अतः विशेष्यन्ते ‘द्विषन्तः’ सपत्नाः इति।

यः एनं द्विषन्तः सपत्नाः ते परिम्रियन्ते, प्राणान् जहति।

किञ्च, ये च अप्रियाः अस्य भ्रातृव्याः अद्विषन्तोऽपि, ते च परिम्रियन्ते।

**अन्नान्नादत्वोपासनवाक्य-सिद्धार्थः**

२१) “प्राणो वा अन्नं शरीरमन्नादम्” (तै. ३.७) इत्यारभ्य आकाशान्तस्य कार्यस्य एव

अन्नान्नादत्वमुक्तम्। उक्तं नाम।

किं तेन? तेनैतत् सिद्धम् भवति - कार्य-विषये एव भोज्य-भोक्तृत्व-कृतः संसारः, न तु आत्मनि

इति। आत्मनि तु भ्रान्त्या उपचर्यते।

**आत्मनोऽसंसारित्वनिरूपणम्**

**पूर्वपक्षः**

ननु आत्मापि परमात्मनः कार्यम्, ततो युक्तः तस्य संसारः इति।

**सिद्धान्तः**

न। असंसारिणः एव प्रवेश-श्रुतेः। "तत्सृष्ट्वा तदेवानुप्राविशत्" (तै. २.६) इति आकाशादि-कारणस्य

हि असंसारिणः एव परमात्मनः कार्येषु अनुप्रवेशः श्रूयते।

तस्मात् कार्यानुप्रविष्टः जीवः आत्मा पर एव असंसारी।

'सृष्ट्वा अनुप्राविशत्' इति समान-कर्तृकत्वोपपत्तेः च।

सर्ग-प्रवेश-क्रिययोः च एकश्चेत्कर्त्ता ततः क्त्वा-प्रत्ययो युक्तः।

**पूर्वपक्षः**

प्रविष्टस्य तु भावान्तरापत्तिरिति चेत्।

**सिद्धान्तः**

न। प्रवेशस्य अन्यार्थत्वेन प्रत्याख्यातत्वात्।

**पूर्वपक्षः**

“अनेन जीवेनात्मना” (छा. ६.३.२) इति विशेष-श्रुतेः धर्मान्तरेण अनुप्रवेशः इति चेत्।

**सिद्धान्तः**

न। “तत्त्वमसि” (छा. ६.८.७) इति पुनः तद्भावोक्तेः।

**पूर्वपक्षः**

भावान्तरापन्नस्यैव तदपोहार्था सम्पदिति चेत्।

**सिद्धान्तः**

न। “तत्सत्यम्” “स आत्मा” “तत्त्वमसि” इति सामानाधिकरण्यात्।

**पूर्वपक्षः**

दृष्टं जीवस्य संसारित्वमिति चेत्।

**सिद्धान्तः**

न। उपलब्धुः अनुपलभ्यत्वात्[13]।

**पूर्वपक्षः**

संसार-धर्म-विशिष्टः आत्मा उपलभ्यते इति चेत्।

**सिद्धान्तः**

न। धर्माणां धर्मिणः अव्यतिरेकात् कर्मत्वानुपपत्तेः। उष्ण-प्रकाशयोः दाह्य-प्रकाश्यत्वानुपपत्तिवत्।

**पूर्वपक्षः**

त्रासादि-दर्शनाद् दुःखित्वाद्यनुमीयते इति चेत्।

**सिद्धान्तः**

न। त्रासादेः दुःखस्य च उपलभ्यमानत्वाद् न उपलब्धृ-धर्मत्वम्।

[13] पा.भेद - उपलब्धृ-रूपत्वात् इति।

**पूर्वपक्षः**

कापिल-काणादादि-तर्क-शास्त्र-विरोधः इति चेत्।

**सिद्धान्तः**

न। तेषां मूलाभावे वेद-विरोधे च भ्रान्तत्वोपपत्तेः। श्रुत्युपपत्तिभ्यां च सिद्धम् आत्मनोऽसंसारित्वम्।

**आत्मनः एकत्वाच्च न संसारित्वम्**

२२) एकत्वाच्च। कथमेकत्वम्? इत्युच्यते - 'स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः'

इत्येवमादि पूर्ववत्।

**स य एवंविदित्यादेः सम्बन्धः**

२३) स एवम् अन्नमयादि-क्रमेण आनन्दमयमात्मानमुपसङ्क्रम्य एतत्साम गायन् आस्ते।

"सत्यं ज्ञानम्" (तै. २.१) इत्यस्याः ऋचः अर्थः व्याख्यातः विस्तरेण तद्-विवरण-भूतया आनन्द-

वल्ल्या।

"सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" (तै. २.१) इत्येतस्य फल-वचनस्य अर्थः

विस्तरेण[14] नोक्तः।

के ते[15]? किं विषया वा सर्वे कामाः? कथं वा ब्रह्मणा सह समश्नुते? इत्येतद्वक्तव्यम् इति इदम्

इदानीमारभ्यते। तत्र पिता-पुत्राख्यायिकायां पूर्व-विद्या-शेष-भूतायां तपः ब्रह्म-विद्या-साधनमुक्तम्।

प्राणादेः आकाशान्तस्य च कार्यस्य अन्नान्नादत्वेन विनियोगश्च उक्तः। ब्रह्म-विषयोपासनानि च।

ये च सर्वे कामाः प्रतिनियतानेक-साधन-साध्याः आकाशादि-कार्य-भेद-विषयाः एते[16] दर्शिताः।

एकत्वे पुनः काम-कामित्वानुपपत्तिः, भेद-जातस्य सर्वस्य आत्म-भूतत्वात्।

---

[14] पा.भेद - अर्थविस्तारः इति।

[15] के ते कामाः।

[16] एव ते इति वा।

तत्र कथं युगपद् ब्रह्म-स्वरूपेण सर्वान् कामान् एवं-वित् समश्नुते? इत्युच्यते -

**विदुषः सर्वकामावाप्तिप्रकारः**

२४) सर्वात्मत्वापत्तेः[17]। कथं सर्वात्मत्वापत्तिः इति? तत्राह - पुरुषादित्यस्थात्मैकत्व-विज्ञानेन

अपोह्योत्कर्षापकर्षौ, अन्नमयाद्यात्मनः अविद्या-कल्पितान् क्रमेण उपसङ्क्रम्य आनन्दमयान्तान्,

सत्यं ज्ञानमनन्तं ब्रह्म अदृश्यादि-धर्मकं स्वाभाविकम् आनन्दम् अजममृतमभयमद्वैतं फलभूतमापन्नः,

इमान् लोकान् भूरादीन् 'अनुसञ्चरन्' इति व्यवहितेन सम्बन्धः।

कथमनुसञ्चरन्? कामान्नी। कामतः अन्नमस्य इति कामान्नी। तथा कामतः रूपाण्यस्य इति कामरूपी।

अनुसञ्चरन् सर्वात्मना इमान् लोकान् आत्मत्वेन अनुभवन्।

---

[17] पा.भेद - सर्वात्मत्वोपपत्तेः इति।

किम्? एतत् साम गायन् आस्ते। समत्वाद् ब्रह्म एव साम सर्वानन्य-रूपं गायन् शब्दयन्।

आत्मैकत्वं प्रख्यापयन् लोकानुग्रहार्थं तद्विज्ञान-फलं च अतीव कृतार्थत्वं गायन् आस्ते तिष्ठति।

कथम्?।

**अत्मज्ञस्य कृतकृत्यताप्रकटनम्**
२५) हा३वु, हा३वु, हा३वु। अहो इत्येतस्मिन् अर्थे अत्यन्त-विस्मय-ख्यापनार्थम्।

कः पुनः असौ विस्मयः? इच्युच्यते - अद्वैतात्मा निरञ्जनः अपि सन्, अहम् एव अन्नम्, अन्नादः च।

किञ्च, अहम् एव श्लोक-कृत्। श्लोको नाम अन्नान्नादयोः सङ्घातः। तस्य कर्त्ता चेतनावान्।

अथवा अन्नस्यैव परार्थस्य अन्नादार्थस्य सतः अनेकात्मकस्य पारार्थ्येन हेतुना सङ्घात-कृत्।

त्रिरुक्तिः विस्मयत्व-ख्यापनार्था।

अहम् अस्मि भवामि प्रथमजाः प्रथमजः प्रथमोत्पन्नः ऋतस्य सत्यस्य मूर्त्तामूर्त्तस्य अस्य जगतः।

देवेभ्यः च पूर्वम्। अमृतस्य अमृतत्वस्य नाभिः मध्यम्। मत्संस्थम् अमृतत्वं प्राणिनामित्यर्थः।

यः कश्चित् मा माम् अन्नम् अन्नार्थिभ्यः ददाति प्रयच्छति, अन्नात्मना ब्रवीति सः इत् इत्थम्

एवमविनष्टं यथा-भूतं आवाः। अवति इत्यर्थः।

यः पुनः अन्यः माम् अदत्वा अर्थिभ्यः काले प्राप्ते अन्नमत्ति तम् अन्नम् अदन्तं भक्षयन्तं पुरुषम् अहम्

अन्नम् एव सन् अद्मि प्रत्यद्मि भक्षयामि।

**आक्षेपः**

अत्राह। एवं तर्हि बिभेमि सर्वात्मत्व-प्राप्तेः मोक्षात्। अस्तु संसारः एव।

यतो मुक्तोऽप्यहम् अन्न-भूतः आद्यः स्याम् अन्यस्य[18]।

**समाधानम्**

एवं मा भैषीः। संव्यवहार-विषयत्वात् सर्व-कामाशनस्य।

अतीत्य अयं संव्यवहार-विषयम् अन्नान्नादादि-लक्षणम् अविद्या-कृतं विद्यया ब्रह्मत्वमापन्नः विद्वान्।

तस्य नैव द्वितीयं वस्त्वन्तरमस्ति यतो बिभेति। अतः न भेतव्यं मोक्षात्।

---

[18] पा.भेद - अन्नस्य इति।

**आक्षेपः**

एवं तर्हि किमिदमाह अहमन्नम् अहमन्नादः इति?

**समाधानम्**

उच्यते। यः अयं अन्नान्नादादि-लक्षणः संव्यवहारः कार्यभूतः, स संव्यवहार-मात्रम् एव।

न परमार्थ-वस्तु। सः एवं-भूतः अपि ब्रह्म-निमित्तः ब्रह्म-व्यतिरेकेण असन्निति कृत्वा ब्रह्म-विद्या-

कार्यस्य ब्रह्म-भावस्य स्तुत्यर्थमुच्यते 'अहमन्नमहमन्नमहमन्नम्, अहमन्नादोऽहमन्नादोऽहमन्नादः' इत्यादि।

अतः भयादि-दोष-गन्धोऽपि अविद्या-निमित्तः अविद्योच्छेदाद् ब्रह्म-भूतस्य नास्ति इति।

अहं विश्वं समस्तं भुवनं भूतैः सम्भजनीयं ब्रह्मादिभिः, भवन्तीति वा अस्मिन् भूतानि इति भुवनम्।

अभ्यभवाम् अभिभवामि परेण ईश्वरेण स्वरूपेण। सुवर्न ज्योतीः। सुवः आदित्यः।

नकारः उपमार्थे[19]। आदित्यः इव सकृद्विभातम् अस्मदीयं ज्योतीः ज्योतिः। प्रकाशः इत्यर्थः।

**वल्लीद्वयोपसंहारः**

२६) इति इयं वल्ली-द्वय-विहिता उपनिषत् परमात्म-ज्ञानम्।

तामेतां यथोक्ताम् उपनिषदं शान्तो दान्तः उपरतः तितिक्षुः समाहितो भूत्वा भृगुवत् तपो महदास्थाय य

एवं वेद, तस्य इदं फलं यथोक्तम्। ओमिति।। १०।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्य-गोविन्दभगवत्-पूज्यपाद-शिष्य-श्रीमच्छङ्करभगवतः कृतौ
तैत्तिरीयोपनिषद्-भृगुवल्ली-भाष्ये दशमोऽनुवाकः।।
।। तैत्तिरीयोपनिषत् भाष्यं सम्पूर्णम्।।

[19] उपमानवाचकपदादूर्ध्वं यो न वर्तते तस्य इवार्थः।